শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ অষ্টাদশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ অষ্টাদশঃ সর্গঃ ॥

## শরণাগতরক্ষণস্য মহত্ত্বং স্বকীযং ব্রতং চ প্রতিপাদ্য শ্রীরামস্য ৱিভীষণেন সহ সমাগমঃ

অথ রামঃ প্রসন্নাত্মা শ্রুৎৱা ৱাযুসুতস্য হ।
প্রত্যভাষত দুর্ধর্ষঃ শ্রুতৱানাত্মনি স্থিতম্॥ **6.18.1** ॥

মমাপি চ ৱিৱক্ষাস্তি কাচিৎ প্রতি ৱিভীষণম্।
শ্রোতুমিচ্ছামি তৎ সর্ৱং ভৱদ্ভিঃ শ্রেযসি স্থিতৈঃ॥ **6.18.2** ॥

মিত্রভাৱেন সম্প্রাপ্তং ন ত্যজেযং কথঞ্চন।
দোষো যদ্যপি তস্য স্যাৎ সতামেতদগর্হিতম্॥ **6.18.3** ॥

সুগ্রীৱস্ত্বথ তদ্ৱাক্যমাভাষ্য চ ৱিমৃশ্য চ।
ততঃ শুভতরং ৱাক্যমুৱাচ হরিপুঙ্গৱঃ॥ **6.18.4** ॥

স দুষ্টো ৱাপ্যদুষ্টো ৱা কিমেষ রজনীচরঃ।
ঈদৃশং ৱ্যসনং প্রাপ্তং ভ্রাতরং যঃ পরিত্যজেৎ॥ **6.18.5** ॥

কো নাম স ভৱেৎ তস্য যমেষ ন পরিত্যজেৎ।
ৱানরাধিপতের্ৱাক্যং শ্রুৎৱা সর্ৱানুদীক্ষ্য তু॥ **6.18.6** ॥

ঈষদুৎস্ময়মানস্তু লক্ষ্মণং পুণ্যলক্ষণম্।
ইতি হোৱাচ কাকুৎস্থো ৱাক্যং সত্যপরাক্রমঃ॥ **6.18.7** ॥

অনধীত্য চ শাস্ত্রাণি ৱৃদ্ধাননুপসেৱ্য চ।
ন শক্যমীদৃশং ৱক্তুং যদুৱাচ হরীশ্ৱরঃ॥ **6.18.8**॥

অস্তি সূক্ষ্মতরং কিঞ্চিদ্ যথাত্র প্রতিভাতি মা।
প্রত্যক্ষং লৌকিকং চাপি ৱর্ততে সর্ৱরাজসু॥ **6.18.9**॥

অমিত্রাস্তৎকুলীনাশ্চ প্রাতিদেশ্যাশ্চ কীর্তিতাঃ।
ৱ্যসনেষু প্রহর্তারস্তস্মাদযমিহাগতঃ॥ **6.18.10**॥

অপাপাস্তৎকুলীনাশ্চ মানযন্তি স্ৱকান্ হিতান্।
এষ প্রাযো নরেন্দ্রাণাং শঙ্কনীযস্তু শোভনঃ॥ **6.18.11**॥

যস্তু দোষস্ত্ৱযা প্রোক্তো হ্যাদানেঽরিবলস্য চ।
তত্র তে কীর্তযিষ্যামি যথাশাস্ত্রমিদং শৃণু॥ **6.18.12**॥

ন ৱযং তৎকুলীনাশ্চ রাজ্যকাঙ্ক্ষী চ রাক্ষসঃ।
পণ্ডিতা হি ভৱিষ্যন্তি তস্মাদ্ গ্রাহ্যো ৱিভীষণঃ॥ **6.18.13**॥

অৱ্যগ্রাশ্চ প্রহৃষ্টাশ্চ তে ভৱিষ্যন্তি সঙ্গতাঃ।
প্রণাদশ্চ মহানেষোঽন্যোন্যস্য ভযমাগতম্।
ইতি ভেদং গমিষ্যন্তি তস্মাদ্ গ্রাহ্যো ৱিভীষণঃ॥ **6.18.14**॥

ন সর্ৱে ভ্রাতরস্তাত ভৱন্তি ভরতোপমাঃ।
মদ্ৱিধা ৱা পিতুঃ পুত্রাঃ সুহৃদো ৱা ভৱদ্ৱিধাঃ॥ **6.18.15**॥

এৱমুক্তস্তু রামেণ সুগ্রীৱঃ সহলক্ষ্মণঃ।
উত্থাযেদং মহাপ্রাজ্ঞঃ প্রণতো ৱাক্যমব্রৱীৎ॥ **6.18.16**॥

রাৱণেন প্রণিহিতং তমৱেহি নিশাচরম্।
তস্যাহং নিগ্রহং মন্যে ক্ষমং ক্ষমৱতাং ৱর॥ **6.18.17**॥

রাক্ষসো জিহ্মযা বুদ্ধ্যা সন্দিষ্টোঽযমিহাগতঃ।
প্রহর্তুং ৎৱযি ৱিশ্ৱস্তে ৱিশ্ৱস্তে মযি ৱানঘ॥ **6.18.18**॥

লক্ষ্মণে ৱা মহাবাহো স ৱধ্যঃ সচিৱৈঃ সহ।
রাৱণস্য নৃশংসস্য ভ্রাতা হ্যেষ ৱিভীষণঃ॥ **6.18.19**॥

এৱমুকত্ৱা রঘুশ্রেষ্ঠং সুগ্রীৱো ৱাহিনীপতিঃ।
ৱাক্যজ্ঞো ৱাক্যকুশলং ততো মৌনমুপাগমৎ॥ **6.18.20**॥

স সুগ্রীৱস্য তদ্ ৱাক্যং রামঃ শ্রুৎৱা ৱিমৃশ্য চ।
ততঃ শুভতরং ৱাক্যমুৱাচ হরিপুঙ্গৱম্॥ **6.18.21**॥

স দুষ্টো ৱাপ্যদুষ্টো ৱা কিমেষ রজনীচরঃ।
সূক্ষ্মমপ্যহিতং কর্তুং মম শক্তঃ কথঞ্চন॥ **6.18.22**॥

পিশাচান্ দানৱান্ যক্ষান্ পৃথিৱ্যাং চৈৱ রাক্ষসান্।
অঙ্গুল্যগ্রেণ তান্ হন্যামিচ্ছন্ হরিগণেশ্ৱর॥ **6.18.23**॥

শ্রূযতে হি কপোতেন শত্রুঃ শরণমাগতঃ।
অর্চিতশ্চ যথান্যাযং স্ৱৈশ্চ মাংসৈর্নিমন্ত্রিতঃ॥ **6.18.24**॥

স হি তং প্রতিজগ্রাহ ভার্যাহর্তারমাগতম্।
কপোতো ৱানরশ্রেষ্ঠ কিং পুনর্মদ্ৱিধো জনঃ॥ **6.18.25**॥

ঋষেঃ কণ্ৱস্য পুত্রেণ কণ্ডুনা পরমর্ষিণা।
শৃণু গাথা পুরা গীতা ধর্মিষ্ঠা সত্যৱাদিনা॥ **6.18.26**॥

বদ্ধাঞ্জলিপুটং দীনং যাচন্তং শরণাগতম্।
ন হন্যাদানৃশংস্যার্থমপি শত্রুং পরন্তপ॥ **6.18.27**॥

আর্তো ৱা যদি ৱা দৃপ্তঃ পরেষাং শরণং গতঃ।
অরিঃ প্রাণান্ পরিত্যজ্য রক্ষিতৱ্যঃ কৃতাত্মনা॥ **6.18.28**॥

স চেদ্ ভযাদ্ ৱা মোহাদ্ ৱা কামাদ্ ৱাপি ন রক্ষতি।
স্বযা শক্ত্যা যথান্যাযং তৎ পাপং লোকগর্হিতম্॥ **6.18.29**॥

ৱিনষ্টঃ পশ্যতস্তস্য রক্ষিণঃ শরণং গতঃ।
আনায সুকৃতং তস্য সর্ৱং গচ্ছেদরক্ষিতঃ॥ **6.18.30**॥

এৱং দোষো মহানত্র প্রপন্নানামরক্ষণে।
অস্বর্গ্যং চাযশস্যং চ বলৱীর্যৱিনাশনম্॥ **6.18.31**॥

করিষ্যামি যথার্থং তু কণ্ডোর্ৱচনমুত্তমম্।
ধর্মিষ্ঠং চ যশস্যং চ স্বর্গ্যং স্যাৎ তু ফলোদযে॥ **6.18.32**॥

সকৃদেৱ প্রপন্নায তৱাস্মীতি চ যাচতে।
অভযং সর্ৱভূতেভ্যো দদাম্যেতদ্ ৱ্রতং মম॥ **6.18.33**॥

আনযৈনং হরিশ্রেষ্ঠ দত্তমস্যাভযং মযা।
ৱিভীষণো ৱা সুগ্রীৱ যদি ৱা রাৱণঃ স্বযম্॥ **6.18.34**॥

রামস্য তু ৱচঃ শ্রুৎৱা সুগ্রীৱঃ প্লৱগেশ্ৱরঃ।
প্রত্যভাষত কাকুৎস্থং সৌহার্দেনাভিপূরিতঃ॥ **6.18.35**॥

কিমত্র চিত্রং ধর্মজ্ঞ লোকনাথশিখামণে।
যৎ ৎৱমার্যং প্রভাষেথাঃ সত্ত্ৱৱান্ সৎপথে স্থিতঃ॥ **6.18.36**॥

মম চাপ্যন্তরাত্মাযং শুদ্ধং ৱেত্তি ৱিভীষণম্।
অনুমানাচ্চ ভাৱাচ্চ সর্ৱতঃ সুপরীক্ষিতঃ॥ **6.18.37**॥

তস্মাৎ ক্ষিপ্রং সহাস্মাভিস্তুল্যো ভৱতু রাঘৱ।
ৱিভীষণো মহাপ্রাজ্ঞঃ সখিৎৱং চাভ্যুপৈতু নঃ॥ **6.18.38**॥

ততস্তু সুগ্রীৱৱচো নিশম্য তদ্ -
 ধরীশ্ৱরেণাভিহিতং নরেশ্ৱরঃ।

ৱিভীষণেনাশু জগাম সঙ্গমং
পতত্রিরাজেন যথা পুরন্দরঃ ॥ **6.18.39** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে অষ্টাদশঃ সর্গঃ ॥